ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः

हरिः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

# चतुर्थ काण्डे – द्वितीयः प्रश्नः

Version 1.0 October 31, 2021

## Version Notes:

**This is now the current Version 1.0 dated October 31, 2021**

1. This replaces the earlier version 0.0 dated Oct 08, 2018.

2. We have listened to the Krama Paaraayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till October 31, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

1st Version Number 0.0 dated October 08, 2018

# Table of Contents

4 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः ....................................4

4.2 चतुर्थ काण्डे द्वितीयः प्रश्नः – देवयजनग्रहाभिधानं .....................4

================================

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

# 4 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## 4.2 चतुर्थ काण्डे द्वितीयः प्रश्नः – देवयजनग्रहाभिधानं

**T.S.4.2.1.1 - Kramam**

विष्णोः क्रमः । क्रमो ऽसि । अस्यभिमातिहा । अभिमातिहा गायत्रम् । अभिमातिहेत्यभिमाति – हा । गायत्रम् छन्दः । छन्द आ । आ रोह । रोह पृथिवीम् । पृथिवीमनु । अनु वि । वि क्रमस्व । क्रमस्व निर्भक्तः । निर्भक्तः सः । निर्भक्त इति निः–भक्तः । स यम् । यम् द्विष्मः । द्विष्मो विष्णोः । विष्णोः क्रमः । क्रमोऽसि । अस्यभिशस्तिहा । अभिशस्तिहा त्रैष्टुभम् । अभिशस्तिहेत्यभिशस्ति–हा । त्रैष्टुभम् छन्दः । छन्द आ । आ रोह । रोहान्तरिक्षम् । अन्तरिक्षमनु । अनु वि । वि क्रमस्व । क्रमस्व निर्भक्तः । निर्भक्तः सः । निर्भक्त इति निः – भक्तः । स यम् । यम् द्विष्मः । द्विष्मो विष्णोः । विष्णोः क्रमः । क्रमोऽसि । अस्यरातीयतः । अरातीयतो हन्ता । हन्ता जागतम् । जागतम् छन्दः ।

छन्द आ । आ रोह । रोह दिवम् । दिवमनु । अनु वि ।

वि क्रमस्व । क्रमस्व निर्भक्तः । निर्भक्तः सः ।

निर्भक्त इति निः – भक्तः । स यम् । यम् द्विष्मः । द्विष्मो विष्णोः ।

विष्णोः क्रमः । 1 (50/55)

**T.S.4.2.1.2 - Kramam**

क्रमोऽसि । असि शत्रूयतः । शत्रूयतो हन्ता । शत्रूयत इति

शत्रु – यतः । हन्ता ऽऽनुष्टुभम् । आनुष्टुभम् छन्दः ।

आनुष्टभमित्यानु – स्तुभम् । छन्द आ । आ रोह । रोह दिशः ।

दिशोऽनु । अनु वि । वि क्रमस्व । क्रमस्व निर्भक्तः । निर्भक्तः सः ।

निर्भक्त इति निः–भक्तः । स यम् । यम् द्विष्मः । द्विष्म इति द्विष्मः ॥

अक्रन्ददग्निः । अग्निः स्तनयन्न् । स्तनयन्निव । इव द्यौः ।

द्यौः क्षाम । क्षामा रेरिहत् । रेरिहद् वीरुधः । वीरुधः समञ्जन्न् ।

समञ्जन्निति सम् – अञ्जन्न् ॥ सद्यो जज्ञानः । जज्ञानो वि ।

वि हि । हीम् । ईमिद्धः । इद्धो अख्यत् । अख्यदा । आ रोदसी ।

रोदसी भानुना । रोदसी इति रोदसी । भानुना भाति । भात्यन्तः ।

अन्तरित्यन्तः ॥ अग्ने ऽभ्यावर्तिन्न् । अभ्यावर्तिन्नभि ।

अभ्यावर्तिन्नित्यभि – आवर्तिन्न् । अभि नः । न आ । आ वर्तस्व । वर्तस्वायुषा । आयुषा वर्चसा । वर्चसा सन्या । सन्या मेधया । मेधया प्रजया । प्रजया धनेन । प्रजयेति प्र – जया । धनेनेति धनेन ॥ अग्ने अङ्गिरः । **2** (**50/56**)

**T.S.4.2.1.3 - Kramam**

अङ्गिरः शतम् । शतम् ते । ते सन्तु । सन्त्वावृतः । आवृतः सहस्रम् । आवृत इत्या–वृतः । सहस्रम् ते । त उपावृतः । उपावृत इत्युप – आवृतः ॥ तासाम् पोषस्य । पोषस्य पोषेण । पोषेण पुनः । पुनर् नः । नो नष्टम् । नष्टमा । आ कृधि । कृधि पुनः । पुनर् नः । नो रयिम् । रयि मा । आ कृधि । कृधीति कृधि ॥ पुनरूर्जा । ऊर्जा नि । नि वर्तस्व । वर्तस्व पुनः । पुनरग्ने । अग्न इषा । इषाऽऽयुषा । आयुषेत्यायुषा ॥ पुनर् नः । नः पाहि । पाहि विश्वतः । विश्वत इति विश्वतः ॥ सह रय्या । रय्या नि । नि वर्तस्व । वर्तस्वाग्ने । अग्ने पिन्वस्व । पिन्वस्व धारया । धारयेति धारया ॥ विश्वफ्स्निया विश्वतः । विश्वफ्स्नियेति विश्व – फ्स्निया ।

विश्वतस्परि । परीति परि ॥ उदुत्तमम् । उत्तमं ँवरुण ।
उत्तममित्युत् – तमम् । वरुण पाशम् । पाशमस्मत् ।
अस्मदव । अवाधमम् । अधमं ँवि । 3 (50/53)

**T.S.4.2.1.4 - Kramam**

वि मद्ध्यमम् । मद्ध्यम७ श्रथाय । श्रथायेति श्रथाय ॥ अथा वयम् ।
वयमादित्य । आदित्य व्रते । व्रते तव । तवानागसः । अनागसो
अदितये । अदितये स्याम । स्यामेति स्याम ॥ आ त्वा ।
त्वाऽहार्.षम् । आहार्.षमन्तः । अन्तरभूः । अभूर् ध्रुवः ।
ध्रुवस्तिष्ठ । तिष्ठाविचाचलिः । अविचाचलिरित्यवि – चाचलिः ॥
विशस्त्वा । त्वा सर्वाः । सर्वा वाञ्छन्तु । वाञ्छन्त्वस्मिन्न् ।
अस्मिन् राष्ट्रम् । राष्ट्रमधि । अधि श्रय । श्रयेति श्रय ॥ अग्रे बृहन्न् ।
बृहन्नुषसाम् । उषसामूर्द्ध्वः । ऊर्द्ध्वो अस्थात् ।
अस्थान् निर्जग्मिवान् । निर्जग्मिवान् तमसः । निर्जग्मिवानिति
निः – जग्मिवान् । तमसो ज्योतिषा । ज्योतिषा । आऽगात् ।
अगादित्यगात् ॥ अग्निर् भानुना । भानुना रुशता । रुशता स्वङ्गः ।
स्वङ्ग आ । स्वङ्ग इति सु – अङ्गः । आ जातः । जातो विश्वा ।

विश्वा सद्मानि । सद्मान्यप्राः । अप्रा इत्यप्राः ॥ सीद त्वम् ।
त्वम् मातुः । मातुरस्याः । अस्या उपस्थे । 4 (50/52)

**T.S.4.2.1.5 - Kramam**

उपस्थे विश्वानि । उपस्थ इत्युप - स्थे । विश्वान्यग्ने ।
अग्ने वयुनानि । वयुनानि विद्वान् । विद्वानिति विद्वान् ॥ मैनाम् ।
एनामर्चिषा । अर्चिषा मा । मा तपसा । तपसाऽभि । अभि शूशुचः ।
शूशुचोऽन्तः । अन्तरस्याम् । अस्यां शुक्रज्योतिः । शुक्रज्योतिर्
वि । शुक्रज्योतिरिति शुक्र - ज्योतिः । वि भाहि । भाहीति भाहि ॥
अन्तरग्ने । अग्ने रुचा । रुचा त्वम् । त्वमुखायै । उखायै सदने ।
सदने स्वे । स्व इति स्वे ॥ तस्यास्त्वम् । त्वं हरसा ।
हरसा तपन्न् । तपन् जातवेदः । जातवेदः शिवः । जातवेद इति
जात - वेदः । शिवो भव । भवेति भव ॥ शिवो भूत्वा ।
भूत्वा मह्यम् । मह्यमग्ने । अग्नेऽथो । अथो सीद । अथो इत्यथो ।
सीद शिवः । शिवस्त्वम् । त्वमिति त्वम् ॥ शिवाः कृत्वा ।
कृत्वा दिशः । दिशः सर्वाः । सर्वाः स्वाम् । स्वां ँयोनिम् ।
योनिमिह । इहा । आऽसदः । असद इत्यसदः ॥

ह॒ꣳसः शुचि॒षत् ( ) । शु॒चि॒षद् वसुः । शु॒चि॒षदिति शुचि – सत् ।
वसुरन्तरिक्ष॒सत् । अ॒न्त॒रि॒क्ष॒सद्धोता । अ॒न्त॒रि॒क्ष॒सदित्यन्तरिक्ष–सत् ।
होता वेदि॒षत् । वे॒दि॒षदतिथिः । वे॒दि॒षदिति वेदि – सत् ।
अतिथिर् दुरोण॒सत् । दु॒रो॒ण॒सदिति दुरोण – सत् ॥ नृ॒षद् व॒रसत् ।
नृ॒षदिति नृ – सत् । व॒र॒सदृ॒तसत् । व॒र॒सदिति वर – सत् । ऋ॒त॒सद्
व्यो॒मसत् । ऋ॒त॒सदित्यृत – सत् । व्यो॒म॒स॒दब्जाः । व्यो॒म॒सदिति
व्योम – सत् । अ॒ब्जा गो॒जाः । अ॒ब्जा इत्यप् – जाः । गो॒जा
ऋ॒तजाः । गो॒जा इति गो – जाः । ऋ॒त॒जा अ॒द्रिजाः । ऋ॒त॒जा
इत्यृत – जाः । अ॒द्रि॒जा ऋ॒तम् । अ॒द्रि॒जा इत्यद्रि – जाः ।
ऋ॒तम् बृ॒हत् । बृ॒हदिति बृ॒हत् ॥ **5** (**66/81**)

*(दि॒व॒मनु वि क्रमस्व॒ निर्भ॒क्तः स यन् द्वि॒ष्मो विष्णो॒ – र्द्धने॒नाग्ने – ऽधम – म॒स्याः – शु॒चि॒षथ् – षोडश च) (A1)*

**T.S.4.2.2.1 - Kramam**

दि॒वस्परि । परि प्र॒थमम् । प्र॒थ॒मम् जज्ञे । ज॒ज्ञे अ॒ग्निः ।
अ॒ग्नि॒रस्मत् । अ॒स्मद् द्वि॒तीयम् । द्वि॒ती॒यम् परि । परि जात॒वेदाः ।
जा॒तवे॒दा इति जा॒त – वे॒दाः ॥ तृ॒तीय॒मफ्सु । अ॒फ्सु नृ॒मणाः ।

अफ्स्वित्यप् – सु । नृमणा अजस्रम् । नृमणा इति नृ – मनाः ।
अजस्रमिन्धानः । इन्धान एनम् । एनम् जरते । जरते स्वाधीः ।
स्वाधीरिति स्व – धीः ॥ विद्मा ते । ते अग्ने । अग्ने त्रेधा ।
त्रेधा त्रयाणि । त्रयाणि विद्म । विद्मा ते । ते सद्म । सद्म विभृतम् ।
विभृतम् पुरुत्रा । विभृतमिति वि – भृतम् । पुरुत्रेति पुरु – त्रा ॥
विद्मा ते । ते नाम । नाम परमम् । परमम् गुहा । गुहा यत् ।
यद् विद्म । विद्मा तम् । तमुथ्सम् । उथ्सं ँयतः । यत आजगन्थ ।
आजगन्थेत्या–जगन्थ ॥ समुद्रे त्वा । त्वा नृमणाः । नृमणा अफ्सु ।
नृमणा इति नृ – मनाः । अफ्स्वन्तः । अफ्स्वित्यप् – सु ।
अन्तर् नृचक्षाः । नृचक्षा ईधे । नृचक्षा इति नृ – चक्षाः ।
ईधे दिवः । दिवो अग्ने । अग्न ऊधन्न् । ऊधन्नित्यूधन्न् ॥
तृतीये त्वा । त्वा रजसि । **6 (50/56)**

**T.S.4.2.2.2 - Kramam**

रजसि तस्थिवाꣳसम् । तस्थिवाꣳसमृतस्य । ऋतस्य योनौ ।
योनौ महिषाः । महिषा अहिन्वन्न् । अहिन्वन्नित्यहिन्वन्न् ॥

अक्रन्ददग्निः । अग्निः स्तनयन्न् । स्तनयन्निव । इव द्यौः ।

द्यौः क्षाम । क्षामा रेरिहत् । रेरिहद् वीरुधः । वीरुधः समञ्जन्न् ।

समञ्जन्निति सम् – अञ्जन्न् ॥ सद्यो जज्ञानः । जज्ञानो वि ।

वि हि । हीम् । ईमिद्धः । इद्धो अख्यत् । अख्यदा । आ रोदसी ।

रोदसी भानुना । रोदसी इति रोदसी । भानुना भाति । भात्यन्तः ।

अन्तरित्यन्तः ॥ उशिक् पावकः । पावको अरतिः ।

अरतिः सुमेधाः । सुमेधा मर्तेषु । सुमेधा इति सु – मेधाः ।

मर्तेष्वग्निः । अग्निरमृतः । अमृतो नि । नि धायि । धायीति धायि ॥

इयर्ति धूमम् । धूममरुषम् । अरुषं भरिभ्रत् । भरिभ्रदुत् । उच्छुक्रेण ।

शुक्रेण शोचिषा । शोचिषा द्याम् । द्यामिनक्षत् । इनक्षदितीनक्षत् ॥

विश्वस्य केतुः । केतुर् भुवनस्य । भुवनस्य गर्भः । गर्भ आ ।

आ रोदसी । 7 (50/52)

**T.S.4.2.2.3 - Kramam**

रोदसी अपृणात् । रोदसी इति रोदसी । अपृणाज् जायमानः ।

जायमान इति जायमानः ॥ वीडुम् चित् । चिददद्रिम् । अद्रिमभिनत् ।

अभिनत् परायन्न् । परायन् जनाः । परायन्निति परा – यन्न् ।

जना यत् । यदग्निम् । अग्निमयजन्त । अयजन्त पञ्च । पञ्चेति पञ्च ॥ श्रीणामुदारः । उदारो धरुणः । धरुणो रयीणाम् । रयीणाम् मनीषाणाम् । मनीषाणाम् प्रार्पणः । प्रार्पणः सोमगोपाः । प्रार्पण इति प्र – अर्पणः । सोमगोपा इति सोम – गोपाः ॥ वसोः सूनुः । सूनुः सहसः । सहसो अफ्सु । अफ्सु राजा । अफ्स्वित्यप् – सु । राजा वि । वि भाति । भात्यग्रे । अग्र उषसाम् । उषसामिधानः । इधान इतीधानः ॥ यस्ते । ते अद्य । अद्य कृणवत् । कृणवद् भद्रशोचे । भद्रशोचेऽपूपम् । भद्रशोच इति भद्र – शोचे । अपूपम् देव । देव घृतवन्तम् । घृतवन्तमग्ने । घृतवन्तमिति घृत – वन्तम् । अग्न इत्यग्ने ॥ प्र तम् । तम् नय । नय प्रतराम् । प्रतरां ँवस्यः । प्रतरामिति प्र – तराम् । वस्यो अच्छ । अच्छाभि । अभि द्युम्नम् । द्युम्नम् देवभक्तम् । देवभक्तं ँयविष्ठ । देवभक्तमिति देव – भक्तम् । यविष्ठेति यविष्ठ ॥ आ तम् । **8** (**50/58**)

**T.S.4.2.2.4 - Kramam**

तम् भज । भज सौश्रवसेषु । सौश्रवसेष्वग्ने । अग्न उक्थउक्थे । उक्थउक्थ आ । उक्थउक्थ इत्युक्थे – उक्थे । आ भज ।

भज शस्यमाने । शस्यमान इति शस्यमाने ॥ प्रियः सूर्ये ।
सूर्ये प्रियः । प्रियो अग्ना । अग्ना भवाति । भवात्युत् । उज् जातेन ।
जातेन भिनदत् । भिनददुत् । उज् जनित्वैः । जनित्वैरिति जनित्वैः ॥
त्वामग्ने । अग्ने यजमानाः । यजमाना अनु । अनु द्यून् ।
द्यून्. विश्वा । विश्वा वसूनि । वसूनि दधिरे । दधिरे वार्याणि ।
वार्याणीति वार्याणि ॥ त्वया सह । सह द्रविणम् । द्रविणमिच्छमानाः ।
इच्छमाना व्रजम् । व्रजम् गोमन्तम् । गोमन्तमुशिजः । गोमन्तमिति
गो – मन्तम् । उशिजो वि । वि वव्रुः । वव्रुरिति वव्रुः ॥ दृशानो
रुक्मः । रुक्म उर्व्या । उर्व्या वि । व्यद्यौत् । अद्यौद् दुर्मर्.षम् ।
दुर्मर्.षमायुः । दुर्मर्.षमिति दुः–मर्.षम् । आयुः श्रिये ।
श्रिये रुचानः । रुचान इति रुचानः ॥ अग्निरमृतः । अमृतो अभवत् ।
अभवद् वयोभिः । वयोभिर् यत् । वयोभिरितिवयः – भिः । यदेनम् ।
एनम् द्यौः । द्यौरजनयत् ( ) । अजनयथ् सुरेताः ।
सुरेता इति सु – रेताः ॥ **9** (**54/58**)

*(तृतिये त्वा – गर्भ आ – यविष्ठाऽऽ – य – च्चत्वारि च) (A2)*

**T.S.4.2.3.1 - Kramam**

अन्नपते ऽन्नस्य । अन्नपत इत्यन्न – पते । अन्नस्य नः । नो देहि । देह्यनमीवस्य । अनमीवस्य शुष्मिणः । शुष्मिण इति शुष्मिणः ॥ प्र प्रदातारम् । प्रदातारम् तारिषः । प्रदातारमिति प्र – दातारम् । तारिष ऊर्जम् । ऊर्जम् नः । नो धेहि । धेहि द्विपदे । द्विपदे चतुष्पदे । द्विपद इति द्वि – पदे । चतुष्पद इति चतुः – पदे ॥ उदु । उ त्वा । त्वा विश्वे । विश्वे देवाः । देवा अग्ने । अग्ने भरन्तु । भरन्तु चित्तिभिः । चित्तिभिरिति चित्ति – भिः ॥ स नः । नो भव । भव शिवतमः । शिवतमः सुप्रतीकः । शिवतम इति शिव – तमः । सुप्रतीको विभावसुः । सुप्रतीक इति सु – प्रतीकः । विभावसुरिति विभा–वसुः ॥ प्रेत् । इदग्ने । अग्ने ज्योतिष्मान् । ज्योतिष्मान्. याहि । याहि शिवेभिः । शिवेभिरर्चिभिः । अर्चिभिस्त्वम् । अर्चिभिरित्यर्चि – भिः । त्वमिति त्वम् ॥ बृहद्भिर् भानुभिः । बृहद्भिरिति बृहत् – भिः । भानुभिर् भासन्न् । भानुभिरितिभानु–भिः । भासन् मा । मा हिꣳसीः । हिꣳसीस्तनुवा । तनुवा प्रजाः ।

प्रजा इति प्र – जाः ॥ समिधाऽग्निम् । समिधेति सम् – इधा । अग्निम् दुवस्यत । दुवस्यत घृतैः । घृतैर् बोधयत । बोधयतातिथिम् । अतिथिमित्यतिथिम् ॥ आ ऽस्मिन्न् । **10** (**50/59**)

**T.S.4.2.3.2 - Kramam**

अस्मिन्न्. हव्या । हव्या जुहोतन । जुहोतनेति जुहोतन ॥ प्रप्रायम् । प्रप्रेति प्र – प्र । अयमग्निः । अग्निर् भरतस्य । भरतस्य शृण्वे । शृण्वे वि । वि यत् । यथ् सूर्यः । सूर्यो न । न रोचते । रोचते बृहत् । बृहद् भाः । भा इति भाः ॥ अभि यः । यः पूरुम् । पूरुम् पृतनासु । पृतनासु तस्थौ । तस्थौ दीदाय । दीदाय दैव्यः । दैव्यो अतिथिः । अतिथिः शिवः । शिवो नः । न इति नः ॥ आपो देवीः । देवीः प्रति । प्रति गृह्णीत । गृह्णीत भस्म । भस्मैतत् । एतथ् स्योने । स्योने कृणुद्ध्वम् । कृणुद्ध्वꣳ सुरभौ । सुरभावु । उ लोके । लोक इति लोके ॥ तस्मै नमन्ताम् । नमन्ताम् जनयः । जनयः सुपत्नीः । सुपत्नीर् माता । सुपत्नीरिति सु – पत्नीः । मातेव । इव पुत्रम् । पुत्रम् बिभृत । बिभृता सु । स्वेनम् । एनमित्येनम् ॥ अफ्स्वग्ने । अफ्स्वित्यप् – सु । अग्ने सधिः । सधिष्टव । तव सः । **11** (**50/53**)

**T.S.4.2.3.3 - Kramam**

सौषधीः । ओषधीरनु । अनु रुद्ध्यसे । रुद्ध्यस इति रुद्ध्यसे ॥

गर्भे सन्न् । सन् जायसे । जायसे पुनः । पुनरिति पुनः ॥ गर्भो

असि । अस्योषधीनाम् । ओषधीनाम् गर्भः । गर्भो वनस्पतीनाम् ।

वनस्पतीनामिति वनस्पतीनाम् ॥ गर्भो विश्वस्य । विश्वस्य भूतस्य ।

भूतस्याग्ने । अग्ने गर्भः । गर्भो अपाम् । अपामसि । असीत्यसि ॥

प्रसद्य भस्मना । प्रसद्येति प्र - सद्य । भस्मना योनिम् । योनिमपः ।

अपश्च । च पृथिवीम् । पृथिवीमग्ने । अग्न इत्यग्ने ॥ स॒ꣳसृज्य

मातृभिः । स॒ꣳसृज्येति सम् - सृज्य । मातृभिस्त्वम् । मातृभिरिति

मातृ - भिः । त्वम् ज्योतिष्मान् । ज्योतिष्मान् पुनः । पुनरा ।

आऽसदः । असद इत्यसदः ॥ पुनरासद्य । आसद्य सदनम् ।

आसद्येत्या - सद्य । सदनमपः । अपश्च । च पृथिवीम् ।

पृथिवीमग्ने । अग्न इत्यग्ने ॥ शेषे मातुः । मातुर् यथा । यथोपस्थे ।

उपस्थेऽन्तः । उपस्थ इत्युप - स्थे । अन्तरस्याम् ।

अस्याꣳ शिवतमः । शिवतम इति शिव - तमः ॥ पुनरूर्जा ।

ऊर्जा नि । **12** (**50/55**)

**T.S.4.2.3.4 - Kramam**

नि वर्तस्व । वर्तस्व पुनः । पुनरग्ने । अग्न इषा । इषाऽऽयुषा । आयुषेत्यायुषा ॥ पुनर् नः । नः पाहि । पाहि विश्वतः । विश्वत इति विश्वतः ॥ सह रय्या । रय्या नि । नि वर्तस्व । वर्तस्वाग्ने । अग्ने पिन्वस्व । पिन्वस्व धारया । धारयेति धारया ॥ विश्वफ्स्निया विश्वतः । विश्वफ्स्नियेति विश्व–फ्स्निया । विश्वतस्परि । परीति परि ॥ पुनस्त्वा । त्वा ऽऽदित्याः । आदित्या रुद्राः । रुद्रा वसवः । वसवः सम् । समिन्धताम् । इन्धताम् पुनः । पुनर् ब्रह्माणः । ब्रह्माणो वसुनीथ । वसुनीथ यज्ञैः । वसुनीथेति वसु – नीथ । यज्ञैरिति यज्ञैः ॥ घृतेन त्वम् । त्वम् तनुवः । तनुवो वर्द्धयस्व । वर्द्धयस्व सत्याः । सत्याः सन्तु । सन्तु यजमानस्य । यजमानस्य कामाः । कामा इति कामाः ॥ बोधा नः । नो अस्य । अस्य वचसः । वचसो यविष्ठ । यविष्ठ मꣳहिष्ठस्य । मꣳहिष्ठस्य प्रभृतस्य । प्रभृतस्य स्वधावः । प्रभृतस्येति प्र – भृतस्य । स्वधाव इति स्वधा – वः ॥ पीयति त्वः । त्वो अनु ( ) । अनु त्वः । त्वो गृणाति ।

गृणाति वन्दारुः । वन्दारुस्ते । ते तनुवम् । तनुवं ँ वन्दे । वन्दे

अग्ने । अग्न इत्यग्ने ॥ स बोधि । बोधि सूरिः । सूरिर् मघवा ।

मघवा वसुदावा । मघवेति मघ – वा । वसुदावा वसुपतिः ।

वसुदावेति वसु – दावा । वसुपतिरिति वसु–पतिः ॥ युयोद्ध्यस्मत् ।

अस्मद् द्वेषाꣳसि । द्वेषाꣳसीति द्वेषाꣳसि ॥ **13 (66/71)**

*(आ – तवो – जाऽ – नु – षोडश च) (A3)*

**T.S.4.2.4.1 - Kramam**

अपेत । इत वि । वीत । इत वि । वि च । च सर्पत । सर्पतातः ।

अतो ये । येऽत्र । अत्र स्थ । स्थ पुराणाः । पुराणा ये । ये च ।

च नूतनाः । नूतना इति नूतनाः ॥ अदादिदम् । इदं ँ यमः ।

यमोऽवसानम् । अवसानम् पृथिव्याः । अवसानमित्यव – सानम् ।

पृथिव्या अक्रन्न् । अक्रन्निमम् । इमम् पितरः । पितरो लोकम् ।

लोकमस्मै । अस्मा इत्यस्मै ॥ अग्नेर् भस्म । भस्मासि ।

अस्यग्नेः । अग्नेः पुरीषम् । पुरीषमसि । असि सम्.(**2**)ज्ञानम् ।

सम्.(**2**)ज्ञानमसि । सम्.(**2**)ज्ञानमिति सम्. – ज्ञानम् ।

असि कामधरणम् । कामधरणम् मयि ।

कामधरणमिति काम – धरणम् । मयि ते । ते कामधरणम् ।

कामधरणम् भूयात् । कामधरणमिति काम – धरणम् ।

भूयादिति भूयात् ॥ सं ँयाः । या वः । वः प्रियाः । प्रियास्तनुवः ।

तनुवः सम् । सम् प्रिया । प्रिया हृदयानि । हृदयानि वः ।

व इति वः ॥ आत्मा वः । वो अस्तु । अस्तु सम्प्रियः । **14 (50/54)**

**T.S.4.2.4.2 - Kramam**

सम्प्रियः सम्प्रियाः । सम्प्रिय इति सम् – प्रियः । सम्प्रियास्तनुवः ।

सम्प्रिया इति सम् – प्रियाः । तनुवो मम । ममेति मम ॥

अय॒ꣳ सः । सो अग्निः । अग्निर् यस्मिन्न् । यस्मिन्थ् सोमम् ।

सोममिन्द्रः । इन्द्रः सुतम् । सुतम् दधे । दधे जठरे ।

जठरे वावशानः । वावशान इति वावशानः ॥ सहस्रियं ँवाजम् ।

वाजमत्यम् । अत्यम् न । न सप्तिम् । सप्तिꣳ ससवान् । ससवान्थ्

सन्न् । ससवानिति स–सवान् । सन्थ् स्तूयसे । स्तूयसे जातवेदः ।

जातवेद इति जात – वेदः ॥ अग्ने दिवः । दिवो अर्णम् ।

अर्णमच्छ । अच्छा जिगासि । जिगास्यच्छ । अच्छा देवान् ।

देवाꣳ ऊचिषे । ऊचिषे धिष्णियाः । धिष्णिया ये । य इति ये ॥

याः परस्तात् । परस्ताद् रोचने । रोचने सूर्यस्य । सूर्यस्य याः ।
याश्च । चावस्तात् । अवस्तादुपतिष्ठन्ते । उपतिष्ठन्त आपः ।
उपतिष्ठन्त इत्युप - तिष्ठन्ते । आप इत्यापः ॥ अग्ने यत् । यत् ते ।
ते दिवि । दिवि वर्चः । वर्चः पृथिव्याम् । पृथिव्यां ँयत् ।
यदोषधीषु । ओषधीष्वफ्सु । **15** (**50/54**)

**T.S.4.2.4.3 - Kramam**

अफ्सु वा । अफ्स्वित्यप् - सु । वा यजत्र । यजत्रेति यजत्र ॥
येनान्तरिक्षम् । अन्तरिक्षमुरु । उर्वाततन्थ । आततन्थ त्वेषः ।
आततन्थेत्या - ततन्थ । त्वेषः सः । स भानुः । भानुरर्णवः ।
अर्णवो नृचक्षाः । नृचक्षा इति नृ - चक्षाः ॥ पुरीष्यासो अग्नयः ।
अग्नयः प्रावणेभिः । प्रावणेभिः सजोषसः । प्रावणेभिरिति
प्र - वनेभिः । सजोषस इति स - जोषसः ॥ जुषन्ताꣳ हव्यम् ।
हव्यमाहुतम् । आहुतमनमीवाः । आहुतमित्या - हुतम् । अनमीवा
इषः । इषो महीः । महीरिति महीः ॥ इडामग्ने । अग्ने पुरुदꣳसम् ।
पुरुदꣳसꣳ सनिम् । पुरुदꣳसमिति पुरु - दꣳसम् । सनिम् गोः ।
गोः शश्वत्तमम् । शश्वत्तमꣳ हवमानाय ।

शश्वत्तममिति शश्वत् – तमम् । हवमानाय साध । साधेति साध ॥
स्यान् नः । नः सूनुः । सूनुस्तनयः । तनयो विजावा । विजावाऽग्ने ।
विजावेति वि – जावा । अग्ने सा । सा ते । ते सुमतिः । सुमतिर्
भूतु । सुमतिरिति सु – मतिः । भूत्वस्मे । अस्मे इत्यस्मे ॥
अयम् ते । ते योनिः । योनिर्. ऋत्वियः । ऋत्वियो यतः ।
यतो जातः । जातो अरोचथाः । अरोचथा इत्यरोचथाः ॥
तम् जानन्न् । जानन्नग्ने । **16** (**50/58**)

**T.S.4.2.4.4 - Kramam**

अग्न आ । आ रोह । रोहाथ । अथा नः । नो वर्द्धय । वर्द्धया
रयिम् । रयिमिति रयिम् ॥ चिदसि । असि तया । तया देवतया ।
देवतया ऽङ्गिरस्वत् । अङ्गिरस्वद् ध्रुवा । ध्रुवा सीद ।
सीद परिचित् । परिचिदसि । परिचिदिति परि – चित् । असि तया ।
तया देवतया । देवतया ऽङ्गिरस्वत् । अङ्गिरस्वद् ध्रुवा । ध्रुवा
सीद । सीद लोकम् । लोकम् पृण । पृण छिद्रम् । छिद्रम् पृण ।
पृणाथो । अथो सीद । अथो इत्यथो । सीद शिवा । शिवा त्वम् ।

त्वमिति त्वम् ॥ इन्द्राग्नी त्वा । इन्द्राग्नी इतीन्द्र – अग्नी । त्वा बृहस्पतिः । बृहस्पतिरस्मिन्न् । अस्मिन्. योनौ । योनावसीषदन्न् । असीषदन्नित्यसीषदन्न् ॥ ता अस्य । अस्य सूददोहसः । सूददोहसः सोमम् । सूददोहस इति सूद – दोहसः । सोमꣳ श्रीणन्ति । श्रीणन्ति पृश्ञयः । पृश्ञय इति पृश्ञयः ॥ जन्मन् देवानाम् । देवानां ँविशः । विशस्त्रिषु । त्रिष्वा । आ रोचने । रोचने दिवः । दिव इति दिवः ॥ **17** (**48/52**)

*(अस्त्वो – षधीषु – जान – न्नष्टाचत्वारिꣳशच्च) (A4)*

**T.S.4.2.5.1 - Kramam**

समितम् । इतꣳ सम् । सम् कल्पेथाम् । कल्पेथाꣳ सम्प्रियौ । सम्प्रियौ रोचिष्णू । सम्प्रियाविति सम् – प्रियौ । रोचिष्णू सुमनस्यमानौ । रोचिष्णू इति रोचिष्णू । सुमनस्यमानाविति सु – मनस्यमानौ ॥ इषमूर्जम् । ऊर्जमभि । अभि सम्ँवसानौ । सम्ँवसानौ सम् । सम्ँवसानाविति सम् – वसानौ । सं ँवाम् । वाम् मनाꣳसि । मनाꣳसि सम् । सं ँव्रता । व्रता सम् । समु । उ चित्तानि । चित्तान्या । आऽकरम् । अकरमित्यकरम् ॥

अग्ने पुरीष्य । पुरीष्याधिपाः । अधिपा भव । अधिपा इत्यधि–पाः । भवा त्वम् । त्वम् नः । न इति नः ॥ इषमूर्जम् । ऊर्जं यजमानाय । यजमानाय धेहि । धेहीति धेहि ॥ पुरीष्यस्त्वम् । त्वमग्ने । अग्ने रयिमान् । रयिमान् पुष्टिमान् । रयिमानिति रयि – मान् । पुष्टिमाँ असि । पुष्टिमानिति पुष्टि – मान् । असीत्यसि ॥ शिवाः कृत्वा । कृत्वा दिशः । दिशः सर्वाः । सर्वाः स्वाम् । स्वां योनिम् । योनिमिह । इहा । आऽसदः । असद इत्यसदः ॥ भवतम् नः । नः समनसौ । समनसौ समोकसौ । समनसाविति स – मनसौ । समोकसावरेपसौ । समोकसाविति सम् – ओकसौ । 18 (50/58)

**T.S.4.2.5.2 - Kramam**

अरेपसावित्यरेपसौ ॥ मा यज्ञम् । यज्ञꣳ हिꣳसिष्टम् । हिꣳसिष्टम् मा । मा यज्ञपतिम् । यज्ञपतिम् जातवेदसौ । यज्ञपतिमिति यज्ञ – पतिम् । जातवेदसौ शिवौ । जातवेदसाविति जात – वेदसौ । शिवौ भवतम् । भवतमद्य । अद्य नः । न इति नः ॥ मातेव । इव पुत्रम् । पुत्रम् पृथिवी । पृथिवी पुरीष्यम् । पुरीष्यमग्निम् । अग्निꣳ स्वे । स्वे योनौ । योनावभाः । अभारुखा । उखेत्युखा ॥ तां विश्वैः । विश्वैर् देवैः ।

देवैर्. ऋतुभिः । ऋतुभिः सम्ँविदानः । ऋतुभिरित्यृतु – भिः ।
सम्ँविदानः प्रजापतिः । सम्ँविदान इति सम् – विदानः । प्रजापतिर्
विश्वकर्मा । प्रजापतिरिति प्रजा – पतिः । विश्वकर्मा वि । विश्वकर्मेति
विश्व – कर्मा । वि मुञ्चतु । मुञ्चत्विति मुञ्चतु ॥ यदस्य । अस्य
पारे । पारे रजसः । रजसः शुक्रम् । शुक्रम् ज्योतिः । ज्योतिरजायत ।
अजायतेत्यजायत ॥ तम् नः । नः पर्.षत् । पर्.षदति । अति द्विषः ।
द्विषोऽग्ने । अग्ने वैश्वानर । वैश्वानर स्वाहा । स्वाहेति स्वाहा ॥
नमः सु । सु ते । ते निर्.ऋते । निर्.ऋते विश्वरूपे ।
निर्.ऋत इति निः – ऋते । विश्वरूपेऽयस्मयम् ।
विश्वरूप इति विश्व – रूपे । **19 (50/58)**

**T.S.4.2.5.3 - Kramam**

अयस्मयं ँवि । वि चृत । चृता बन्धम् । बन्धमेतम् । एतमित्येतम् ॥
यमेन त्वम् । त्वं ँयम्या । यम्या सम्ँविदाना । सम्ँविदानोत्तमम् ।
सम्ँविदानेति सम् – विदाना । उत्तमम् नाकम् ।
उत्तममित्युत् – तमम् । नाकमधि । अधि रोहय । रोहयेमम् ।
इममितीमम् ॥ यत् ते । ते देवी । देवी निर्.ऋतिः ।

निर्.ऋतिराबबन्ध । निर्.ऋतिरिति निः – ऋतिः । आबबन्ध दाम । आबबन्धेत्या – बबन्ध । दाम ग्रीवासु । ग्रीवास्वविचर्त्यम् । अविचर्त्यमित्यवि–चर्त्यम् ॥ इदम् ते । ते तत् । तद् वि । वि ष्यामि । स्याम्यायुषः । आयुषो न । न मद्ध्यात् । मद्ध्यादथ । अथा जीवः । जीवः पितुम् । पितुमद्धि । अद्धि प्रमुक्तः । प्रमुक्त इति प्र – मुक्तः ॥ यस्यास्ते । ते अस्याः । अस्याः क्रूरे । क्रूर आसन्न् । आसन् जुहोमि । जुहोम्येषाम् । एषाम् बन्धानाम् । बन्धानामवसर्जनाय । अवसर्जनायेत्यव – सर्जनाय ॥ भूमिरिति । इति त्वा । त्वा जनाः । जनाविदुः । विदुर् निर्.ऋतिः । निर्.ऋतिरिति । निर्.ऋतिरिति निः – ऋतिः । **20 (50/55)**

**T.S.4.2.5.4 - Kramam**

इति त्वा । त्वाऽहम् । अहम् परि । परि वेद । वेद विश्वतः । विश्वत इति विश्वतः ॥ असुन्वन्तमयजमानम् । अयजमानमिच्छ । इच्छ स्तेनस्य । स्तेनस्येत्याम् । इत्याम् तस्करस्य । तस्करस्यानु । अन्वेषि । एषीत्येषि ॥ अन्यमस्मत् । अस्मदिच्छ । इच्छ सा ।

सा ते । त इत्या । इत्या नमः । नमो देवि । देवि निर्.ऋते ।

निर्.ऋते तुभ्यम् । निर्.ऋत इति निः - ऋते । तुभ्यमस्तु ।

अस्त्वियस्तु ॥ देवीमहम् । अहम् निर्.ऋतिम् । निर्.ऋतिं ँवन्दमानः ।

निर्.ऋतिमिति निः - ऋतिम् । वन्दमानः पिता । पितेव । इव पुत्रम् ।

पुत्रम् दसये । दसये वचोभिः । वचोभिरिति वचः - भिः ॥

विश्वस्य या । या जायमानस्य । जायमानस्य वेद । वेद शिरश्शिरः ।

शिरश्शिरः प्रति । शिरश्शिर इति शिरः - शिरः । प्रति सूरी ।

सूरी वि । वि चष्टे । चष्ट इति चष्टे ॥ निवेशनः सङ्गमनः ।

निवेशन इति नि - वेशनः । सङ्गमनो वसूनाम् । सङ्गमन इति

सम् - गमनः । वसूनां ँविश्वा । विश्वा रूपा । रूपाऽभि ।

अभि चष्टे । चष्टे शचीभिः । **21 (50/55)**

**T.S.4.2.5.5 - Kramam**

शचीभिरिति शचि - भिः ॥ देव इव । इव सविता । सविता

सत्यधर्मा । सत्यधर्मेन्द्रः । सत्यधर्मेति सत्य - धर्मा । इन्द्रो न ।

न तस्थौ । तस्थौ समरे । समरे पथीनाम् । समर इति सम् - अरे ।

पथीनामिति पथीनाम् ॥ सं ँवरत्राः । वरत्रा दधातन । दधातन निः ।

निराहावान् । आहावान् कृणोतन । आहावानित्या – हावान् ।
कृणोतनेति कृणोतन ॥ सिञ्चामहा अवटम् । अवटमुद्रिणम् । उद्रिणं
वयम् । वयं विश्वा । विश्वाऽहा । अहाऽदस्तम् । अदस्तमक्षितम् ।
अक्षितमित्यक्षितम् ॥ निष्कृताहावमवटम् । निष्कृताहावमिति
निष्कृत – आहावम् । अवट॒ँ सुवरत्रम् । सुवरत्र॒ँ सुषेचनम् ।
सुवरत्रमिति सु – वरत्रम् । सुषेचनमिति सु – सेचनम् ॥ उद्रिण॒ँ
सिञ्चे । सिञ्चे अक्षितम् । अक्षितमित्यक्षितम् ॥ सीरा युञ्जन्ति ।
युञ्जन्ति कवयः । कवयो युगा । युगा वि । वि तन्वते ।
तन्वते पृथक् । पृथगिति पृथक् ॥ धीरा देवेषु । देवेषु सुम्नया ।
सुम्नयेति सुम्नया ॥ युनक्त सीरा । सीरा वि । वि युगा ।
युगा तनोत । तनोत कृते । कृते योनौ । योनौ वपत । वपतेह ।
इह बीजम् । **22** (**50/55**)

**T.S.4.2.5.6 - Kramam**

बीजमिति बीजम् ॥ गिरा च । च श्रुष्टिः । श्रुष्टिः सभराः ।
सभरा असत् । सभरा इति स – भराः । असन् नः । नो नेदीयः ।
नेदीय इत् । इथ् सृण्या । सृण्या पक्वम् । पक्वमा । आऽयत् ।

अयदित्ययत् ॥ लाङ्गलम् पवीरवम् । पवीरव७ँ सुशेवम् ।
सुशेव७ँ सुमतित्थ्सरु । सुशेवमिति सु - शेवम् । सुमतित्थ्सर्विति
सुमति- थ्सरु ॥ उदित् । इत् कृषति । कृषति गाम् । गामविम् ।
अविम् प्रफर्व्यम् । प्रफर्व्यम् च । प्रफर्व्यमिति प्र - फर्व्यम् ।
च पीवरीम् । पीवरीमिति पीवरीम् ॥ प्रस्थावद् रथवाहनम् ।
प्रस्थावदिति प्रस्थ-वत् । रथवाहनमिति रथ-वाहनम् ॥ शुनम् नः ।
नः फालाः । फाला वि । वि तुदन्तु । तुदन्तु भूमिम् ।
भूमि७ँ शुनम् । शुनम् कीनाशाः । कीनाशा अभि । अभि यन्तु ।
यन्तु वाहान् । वाहानिति वाहान् ॥ शुनम् पर्जन्यः । पर्जन्यो मधुना ।
मधुना पयोभिः । पयोभिः शुनासीरा । पयोभिरिति पयः - भिः ।
शुनासीरा शुनम् । शुनमस्मासु । अस्मासु धत्तम् । धत्तमिति
धत्तम् ॥ कामम् कामदुघे । कामदुघे धुक्ष्व । कामदुघ इति
काम - दुघे । धुक्ष्व मित्राय ( ) । मित्राय वरुणाय । वरुणाय च ।
चेति च ॥ इन्द्रायाग्नये । अग्नये पूष्णे । पूष्ण ओषधीभ्यः ।
ओषधीभ्यः प्रजाभ्यः । ओषधीभ्य इत्योषधि - भ्यः ।

प्रजाभ्य इति प्र – जाभ्यः ॥ घृतेन सीता । सीता मधुना । मधुना समक्ता । समक्ता विश्वैः । समक्तेति सम् – अक्ता । विश्वैर् देवैः । देवैरनुमता । अनुमता मरुद्भिः । अनुमतेत्यनु – मता । मरुद्भिरिति मरुत् – भिः ॥ ऊर्जस्वती पयसा । पयसा पिन्वमाना । पिन्वमानाऽस्मान् । अस्मान्थ् सीते । सीते पयसा । पयसा ऽभ्याववृथ्स्व । अभ्याववृथ्स्वेत्यभि – आववृथ्स्व ॥ **23** (**72/81**)

*(समोकसौ – विश्वरूपे – विदुर्निर्.ऋति – रभि चष्ट – इह – मित्राय – द्वावि॑ꣳशतिश्च) (A5)*

**T.S.4.2.6.1 - Kramam**

या जाताः । जाता ओषधयः । ओषधयो देवेभ्यः । देवेभ्य स्त्रियुगम् । त्रियुगम् पुरा । त्रियुगमिति त्रि – युगम् । पुरेति पुरा ॥ मन्दामि बभ्रूणाम् । बभ्रूणामहम् । अह॑ꣳ शतम् । शतम् धामानि । धामानि सप्त । सप्त च । चेति च ॥ शतं॑ वः । वो अम्ब । अम्ब धामानि । धामानि सहस्रम् । सहस्रमुत । उत वः । वो रुहः । रुह इति रुहः ॥ अथा शतक्रत्वः । शतक्रत्वो यूयम् । शतक्रत्व इति शत – क्रत्वः ।

यूयमिमम् । इमम् मे । मे अगदम् । अगदम् कृत । कृतेति कृत ॥
पुष्पावतीः प्रसूवतीः । पुष्पावतीरिति पुष्प – वतीः ।
प्रसूवतीः फलिनीः । प्रसूवतीरिति प्र – सूवतीः । फलिनीरफलाः ।
अफला उत । उतेत्युत ॥ अश्वा इव । इव सजित्वरीः । सजित्वरीर्
वीरुधः । सजित्वरीरिति स – जित्वरीः । वीरुधः पारयिष्णवः ।
पारयिष्णव इति पारयिष्णवः ॥ ओषधीरिति । इति मातरः ।
मातरस्तत् । तद् वः । वो देवीः । देवीरुप । उप ब्रुवे । ब्रुव इति
ब्रुवे ॥ रपाꣳसि विघ्नतीः । विघ्नतीरित । विघ्नतीरिति वि – घ्नतीः ।
इत रपः । रपश्चातयमानाः । **24 (50/56)**

**T.S.4.2.6.2 - Kramam**

चातयमाना इति चातयमानाः ॥ अश्वत्थे वः । वो निषदनम् ।
निषदनम् पर्णे । निषदनमिति नि–सदनम् । पर्णे वः । वो वसतिः ।
वसतिः कृता । कृतेति कृता ॥ गोभाज इत् । गोभाज इति
गो – भाजः । इत् किल । किलासथ । असथ यत् । यथ् सनवथ ।
सनवथ पूरुषम् । पूरुषमिति पूरुषम् ॥ यदहम् । अहं ँवाजयन्न् ।
वाजयन्निमाः । इमा ओषधीः । ओषधीर्. हस्ते । हस्त आदधे ।

आदध इत्या – दधे ॥ आत्मा यक्ष्मस्य । यक्ष्मस्य नश्यति ।
नश्यति पुरा । पुरा जीवगृभः । जीवगृभो यथा । जीवगृभ इति
जीव – गृभः । यथेति यथा ॥ यदोषधयः । ओषधयः सङ्गच्छन्ते ।
सङ्गच्छन्ते राजानः । सङ्गच्छन्त इति सम् – गच्छन्ते । राजानः
समितौ । समिताविव । समिताविति सम् – इतौ । इवेतीव ॥
विप्रः सः । स उच्यते । उच्यते भिषक् । भिषग् रक्षोहा ।
रक्षोहाऽमीवचातनः । रक्षोहेति रक्षः – हा । अमीवचातन
इत्यमीव – चातनः ॥ निष्कृतिर् नाम । निष्कृतिरिति निः – कृतिः ।
नाम वः । वो माता । माताऽथ । अथा यूयम् । यूय७ स्थ ।
स्थ सङ्कृतीः । सङ्कृतीरिति सम् – कृतीः ॥ सराः पतत्रिणीः ।
पतत्रिणीः स्थन । **25** (**50/57**)

**T.S.4.2.6.3 - Kramam**

स्थन यत् । यदामयति । आमयति निः । निष्कृत । कृतेति कृत ॥
अन्या वः । वो अन्याम् । अन्यामवतु । अवत्वन्या । अन्याऽन्यस्याः ।
अन्यस्या उप । उपावत । अवतेत्यवत ॥ ताः सर्वाः ।
सर्वा ओषधयः । ओषधयः सम्ँविदानाः । सम्ँविदाना इदम् ।

सम्ँविदाना इति सम् – विदानाः । इदम् मे । मे प्र । प्रावत ।
अवता वचः । वच इति वचः ॥ उच्छुष्माः । शुष्मा ओषधीनाम् ।
ओषधीनाम् गावः । गावो गोष्ठात् । गोष्ठादिव । गोष्ठादिति
गो – स्थात् । इवेरते । ईरत इतीरते ॥ धन<sup></sup>् सनिष्यन्तीनाम् ।
सनिष्यन्तीनामात्मानम् । आत्मानम् तव । तव पूरुष । पूरुषेति
पूरुष ॥ अति विश्वाः । विश्वाः परिष्ठाः । परिष्ठाः स्तेनः ।
परिष्ठा इति परि – स्थाः । स्तेन इव । इव व्रजम् । व्रजमक्रमुः ।
अक्रमुरित्यक्रमुः ॥ ओषधयः प्र । प्राचुच्यवुः । अचुच्यवुर् यत् ।
यत् किम् । किञ्च । च तनुवाम् । तनुवा॑ रपः । रप इति रपः ॥
यास्ते । **26** (**50/53**)

**T.S.4.2.6.4 - Kramam**

त आतस्थुः । आतस्थुरात्मानम् । आतस्थुरित्या – तस्थुः ।
आत्मानं ँयाः । या आविविशुः । आविविशुः परुःपरुः ।
आविविशुरित्या – विविशुः । परुःपरुरिति परुः – परुः ॥ तास्ते ।
ते यक्ष्मम् । यक्ष्मं ँवि । वि बाधन्ताम् । बाधन्तामुग्रः ।
उग्रो मद्ध्यमशीः । मद्ध्यमशीरिव ।

मद्ध्यमशीरिति मद्ध्यम - शीः । इवेतीव ॥ साकं ँयक्ष्म । यक्ष्म प्र । प्र पत । पत श्येनेन । श्येनेन किकिदीविना । किकिदीविनेति किकिदीविना ॥ साकं ँवातस्य । वातस्य ध्राज्या । ध्राज्या साकम् । साकम् नश्य । नश्य निहाकया । निहाकयेति नि - हाकया ॥ अश्वावती९ँ सोमवतीम् । अश्वावतीमित्यश्व - वतीम् । सोमवतीमूर्जयन्तीम् । सोमवतीमिति सोम - वतीम् । ऊर्जयन्तीमुदोजसम् । उदोजसमित्युत् - ओजसम् ॥ आ विथ्सि । विथ्सि सर्वाः । सर्वा ओषधीः । ओषधीरस्मै । अस्मा अरिष्टतातये । अरिष्टतातय इत्यरिष्ट - तातये ॥ याः फलिनीः । फलिनीर् याः । या अफलाः । अफला अपुष्पाः । अपुष्पा याः । याश्च । च पुष्पिणीः । पुष्पिणीरिति पुष्पिणीः ॥ बृहस्पतिप्रसूतास्ताः । बृहस्पतिप्रसूता इति बृहस्पति - प्रसूताः । ता नः । नो मुञ्चन्तु । मुञ्चन्त्व९ँहसः । अ९ँहस इत्य९ँहसः ॥

या ओषधयः । **27** (**50/56**)

**T.S.4.2.6.5 - Kramam**

ओषधयः सोमराज्ञीः । सोमराज्ञीः प्रविष्टाः । सोमराज्ञीरिति

सोम - राज्ञीः । प्रविष्टाः पृथिवीम् । प्रविष्टा इति प्र - विष्टाः ।

पृथिवीमनु । अन्वित्यनु ॥ तासाम् त्वम् । त्वमसि । अस्युत्तमा ।

उत्तमा प्र । उत्तमेत्युत्-तमा । प्र णः । नो जीवातवे । जीवातवे सुव ।

सुवेति सुव ॥ अवपतन्तीरवदन्न् । अवपतन्तीरित्यव - पतन्तीः ।

अवदन् दिवः । दिव ओषधयः । ओषधयः परि । परीति परि ॥

यम् जीवम् । जीवमश्नवामहै । अश्नवामहै न । न सः ।

स रिष्याति । रिष्याति पूरुषः । पूरुष इति पूरुषः ॥ याश्च । चेदम् ।

इदमुपशृण्वन्ति । उपशृण्वन्ति याः । उपशृण्वन्तीत्युप - शृण्वन्ति ।

याश्च । च दूरम् । दूरम् परागताः । परागता इति परा - गताः ॥

इह सङ्गत्य । सङ्गत्य ताः । सङ्गत्येति सम् - गत्य । ताः सर्वाः ।

सर्वा अस्मै । अस्मै सम् । सम् दत्त । दत्त भेषजम् । भेषजमिति

भेषजम् ॥ मा वः । वो रिषत् । रिषत् खनिता । खनिता यस्मै ।

यस्मै च । चाहम् । अहम् खनामि । खनामि वः ( ) । व इति वः ॥

द्विपच्चतुष्पत् । द्विपदिति द्वि - पत् । चतुष्पदस्माकम् ।

चतुष्पदिति चतुः – पत् । अस्माकꣳ सर्वम् । सर्वमस्तु ।
अस्त्वनातुरम् । अनातुरमित्यना–तुरम् ॥ ओषधयः सम् । सं ँवदन्ते ।
वदन्ते सोमेन । सोमेन सह । सह राज्ञा । राज्ञेति राज्ञा ॥
यस्मै करोति । करोति ब्राह्मणः । ब्राह्मणस्तम् । तꣳ राजन्न् ।
राजन् पारयामसि । पारयामसीति पारयामसि ॥ **28** (**68/76**)

*(रपः – पतत्रिणी – र्या – अꣳहसो याः – खनामि वो – ऽष्टादश च) (A6)*

**T.S.4.2.7.1 - Kramam**

मा नः । नो हिꣳसीत् । हिꣳसीज् जनिता । जनिता यः ।
यः पृथिव्याः । पृथिव्या यः । यो वा । वा दिवम् । दिवꣳ सत्यधर्मा ।
सत्यधर्मा जजान । सत्यधर्मेति सत्य – धर्मा । जजानेति जजान ॥
यश्च । चापः । अपश्चन्द्राः । चन्द्रा बृहतीः । बृहतीर् जजान ।
जजान कस्मै । कस्मै देवाय । देवाय हविषा । हविषा विधेम ।
विधेमेति विधेम ॥ अभ्यावर्तस्व पृथिवि ।
अभ्यावर्तस्वेत्यभि – आवर्तस्व । पृथिवि यज्ञेन । यज्ञेन पयसा ।
पयसा सह । सहेति सह ॥ वपाम् ते । ते अग्निः । अग्निरिषितः ।

इषितोऽव । अव सर्पतु । सर्पत्विति सर्पतु ॥ अग्ने यत् । यत् ते ।
ते शुक्रम् । शुक्रं ँयत् । यच् चन्द्रम् । चन्द्रम् ँयत् । यत् पूतम् ।
पूतं ँयत् । यद् यज्ञियम् । यज्ञियमिति यज्ञियम् ॥ तद् देवेभ्यः ।
देवेभ्यो भरामसि । भरामसीति भरामसि ॥ इषमूर्जम् । ऊर्जमहम् ।
अहमितः । इत आ । आ ददे । **29 (50/52)**

**T.S.4.2.7.2 - Kramam**

दद ऋतस्य । ऋतस्य धाम्नः । धाम्नो अमृतस्य । अमृतस्य योनेः ।
योनेरिति योनेः ॥ आ नः । नो गोषु । गोषु विशतु । विशत्वा ।
औषधीषु । ओषधीषु जहामि । जहामि सेदिम् । सेदिमनिराम् ।
अनिराममीवाम् । अमीवामित्यमीवाम् ॥ अग्ने तव । तव श्रवः ।
श्रवो वयः । वयो महि । महि भ्राजन्ति । भ्राजन्त्यर्चयः । अर्चयो
विभावसो । विभावसो इति विभा – वसो ॥ बृहद्भानो शवसा ।
बृहद्भानो इति बृहत् – भानो । शवसा वाजम् । वाजमुक्थ्यम् ।
उक्थ्यम् दधासि । दधासि दाशुषे । दाशुषे कवे । कव इति कवे ॥
इरज्यन्नग्ने । अग्ने प्रथयस्व । प्रथयस्व जन्तुभिः । जन्तुभिरस्मे ।
जन्तुभिरिति जन्तु – भिः । अस्मे रायः । अस्मे इत्यस्मे ।

रायो अमर्त्य । अमर्त्येत्यमर्त्य ॥ स दर्.शतस्य । दर्.शतस्य वपुषः ।
वपुषो वि । वि राजसि । राजसि पृणक्षि । पृणक्षि सानसिम् ।
सानसिꣳ रयिम् । रयिमिति रयिम् ॥ ऊर्जो नपात् । नपाज् जातवेदः ।
जातवेदः सुशस्तिभिः । जातवेद इति जात - वेदः ।
सुशस्तिभिर् मन्दस्व । सुशस्तिभिरिति सुशस्ति - भिः ।
मन्दस्व धीतिभिः । **30** (**50/55**)

**T.S.4.2.7.3 - Kramam**

धीतिभिर् हितः । धीतिभिरिति धीति - भिः । हित इति हितः ॥
त्वे इषः । त्वे इति त्वे । इषः सम् । सम् दधुः । दधुर् भूरिरेतसः ।
भूरिरेतसश्चित्रोतयः । भूरिरेतस इति भूरि - रेतसः । चित्रोतयो
वामजाताः । चित्रोतय इति चित्र - ऊतयः । वामजाता इति
वाम - जाताः ॥ पावकवर्चाः शुक्रवर्चाः । पावकवर्चा इति
पावक - वर्चाः । शुक्रवर्चा अनूनवर्चाः । शुक्रवर्चा इति
शुक्र - वर्चाः । अनूनवर्चा उत् । अनूनवर्चा इत्यनून - वर्चाः ।
उदियर्.षि । इयर्.षि भानुना । भानुनेति भानुना ॥ पुत्रः पितरा ।

पितरा विचरन्न् । विचरन्नुप । विचरन्निति वि – चरन्न् । उपावसि ।
अवस्युभे । उभे पृणक्षि । उभे इत्युभे । पृणक्षि रोदसी । रोदसी
इति रोदसी ॥ ऋतावानम् महिषम् । ऋतावानमित्यृत – वानम् ।
महिषं ँविश्वचर्.षणिम् । विश्वचर्.षणिमग्निम् । विश्वचर्.षणिमिति
विश्व–चर्.षणिम् । अग्नि॑ सुम्नाय । सुम्नाय दधिरे । दधिरे पुरः ।
पुरो जनाः । जना इति जनाः ॥ श्रुत्कर्ण॑ सप्रथस्तमम् ।
श्रुत्कर्णमिति श्रुत् – कर्णम् । सप्रथस्तमम् त्वा । सप्रथस्तममिति
सप्रथः – तमम् । त्वा गिरा । गिरा दैव्यम् । दैव्यम् मानुषा ।
मानुषा युगा । युगेति युगा ॥ निष्कर्तारमद्ध्वरस्य । निष्कर्तारमिति
निः – कर्तारम् । अद्ध्वरस्य प्रचेतसम् । प्रचेतसम् क्षयन्तम् ।
प्रचेतसमिति प्र – चेतसम् । क्षयन्त॑ राधसे । राधसे महे ।
मह इति महे ॥ रातिम् भृगूणाम् । भृगूणामुशिजम् । उशिजम्
कविक्रतुम् । कविक्रतुम् पृणक्षि । कविक्रतुमिति कवि – क्रतुम् ।
पृणक्षि सानसिम् । सानसि॑ रयिम् । **31 (50/66)**

**T.S.4.2.7.4 - Kramam**

रयिमिति रयिम् ॥ चितः स्थ । स्थ परिचितः । परिचित ऊर्द्ध्वचितः । परिचित इति परि – चितः । ऊर्द्ध्वचितः श्रयद्ध्वम् । ऊर्द्ध्वचित इत्यूर्द्ध्व – चितः । श्रयद्ध्वम् तया । तया देवतया । देवतया ऽङ्गिरस्वत् । अङ्गिरस्वद् ध्रुवाः । ध्रुवाः सीदत । सीदतेति सीदत ॥ आ प्यायस्व । प्यायस्व सम् । समेतु । एतु ते । ते विश्वतः । विश्वतः सोम । सोम वृष्णियम् । वृष्णियमिति वृष्णियम् ॥ भवा वाजस्य । वाजस्य सङ्गथे । सङ्गथ इति सम्–गथे ॥ सम् ते । ते पयाꣳसि । पयाꣳसि सम् । समु । उ यन्तु । यन्तु वाजाः । वाजाः सम् । सं ँवृष्णियानि । वृष्णियान्यभिमातिषाहः । अभिमातिषाह इत्यभिमाति – साहः ॥ आप्यायमानो अमृताय । आप्यायमान इत्या – प्यायमानः । अमृताय सोम । सोम दिवि । दिवि श्रवाꣳसि । श्रवाꣳस्युत्तमानि । उत्तमानि धिष्व । उत्तमानीत्युत् – तमानि । धिष्वेति धिष्व ॥ **32** (**40/43**)

*(आ – मन्दस्व – सानसि – मेकान्न चत्वारिꣳशच्च) (A7)*

**T.S.4.2.8.1 - Kramam**

अभ्यस्थात् । अस्थाद् विश्वाः । विश्वाः पृतनाः । पृतना अरातीः । अरातीस्तत् । तदग्निः । अग्निराह । आह तत् । तदु । उ सोमः । सोम आह । आहेत्याह ॥ बृहस्पतिः सविता । सविता तत् । तन् मे । म आह । आह पूषा । पूषा मा । माऽधात् । अधाथ् सुकृतस्य । सुकृतस्य लोके । सुकृतस्येति सु - कृतस्य । लोक इति लोके ॥ यदक्रन्दः । अक्रन्दः प्रथमम् । प्रथमम् जायमानः । जायमान उद्यन्न् । उद्यन्थ् समुद्रात् । उद्यन्नित्युत् - यन्न् । समुद्रादुत । उत वा । वा पुरीषात् । पुरीषादिति पुरीषात् ॥ श्येनस्य पक्षा । पक्षा हरिणस्य । हरिणस्य बाहू । बाहू उपस्तुतम् । बाहू इति बाहू । उपस्तुतम् जनिम । उपस्तुतमित्युप - स्तुतम् । जनिम तत् । तत् ते । ते अर्वन्न् । अर्वन्नित्यर्वन्न् ॥ अपाम् पृष्ठम् । पृष्ठमसि । असि योनिः । योनिरग्नेः । अग्नेः समुद्रम् । समुद्रमभितः । अभितः पिन्वमानम् । पिन्वमानमिति पिन्वमानम् ॥ वर्द्धमानम् महः । मह आ । **33 (50/54)**

**T.S.4.2.8.2 - Kramam**

आ च । च पुष्करम् । पुष्करम् दिवः । दिवो मात्रया । मात्रया वरिणा । वरिणा प्रथस्व । प्रथस्वेति प्रथस्व ॥ ब्रह्म जज्ञानम् । जज्ञानम् प्रथमम् । प्रथमम् पुरस्तात् । पुरस्ताद् वि । वि सीमतः । सीमतः सुरुचः । सुरुचो वेनः । सुरुच इति सु – रुचः । वेन आवः । आव इत्यावः ॥ स बुद्ध्नियाः । बुद्ध्निया उपमाः । उपमा अस्य । उपमा इत्युप – माः । अस्य विष्ठाः । विष्ठाः सतः । विष्ठा इति वि – स्थाः । सतश्च । च योनिम् । योनिमसतः । असतश्च । च विवः । विव इति विवः ॥ हिरण्यगर्भः सम् । हिरण्यगर्भ इति हिरण्य – गर्भः । समवर्तत । अवर्तताग्रे । अग्रे भूतस्य । भूतस्य जातः । जातः पतिः । पतिरेकः । एक आसीत् । आसीदित्यासीत् ॥ स दाधार । दाधार पृथिवीम् । पृथिवीम् द्याम् । द्यामुत । उतेमाम् । इमाम् कस्मै । कस्मै देवाय । देवाय हविषा । हविषा विधेम । विधेमेति विधेम ॥ द्रप्सश्चस्कन्द । चस्कन्द पृथिवीम् । पृथिवीमनु । अनु द्याम् । **34 (50/54)**

**T.S.4.2.8.3 - Kramam**

द्यामिमम् । इमम् च । च योनिम् । योनिमनु । अनु यः । यश्च ।
च पूर्वः । पूर्व इति पूर्वः ॥ तृतीयं ँयोनिम् । योनिमनु । अनु
सञ्चरन्तम् । सञ्चरन्तम् द्रप्सम् । सञ्चरन्तमिति सम् – चरन्तम् ।
द्रप्सम् जुहोमि । जुहोम्यनु । अनु सप्त । सप्त होत्राः । होत्रा इति
होत्राः ॥ नमो अस्तु । अस्तु सर्पेभ्यः । सर्पेभ्यो ये । ये के ।
के च । च पृथिवीम् । पृथिवीमनु । अन्वित्यनु ॥ ये अन्तरिक्षे ।
अन्तरिक्षे ये । ये दिवि । दिवि तेभ्यः । तेभ्यः सर्पेभ्यः । सर्पेभो
नमः । नम इति नमः ॥ येऽदः । अदो रोचने । रोचने दिवः ।
दिवो ये । ये वा । वा सूर्यस्य । सूर्यस्य रश्मिषु । रश्मिष्विति
रश्मिषु ॥ येषामफ्सु । अफ्सु सदः । अफ्स्वित्यप् – सु ।
सदः कृतम् । कृतम् तेभ्यः । तेभ्यः सर्पेभ्यः । सर्पेभ्यो नमः ।
नम इति नमः ॥ या इषवः । इषवो यातुधानानाम् । यातुधानानां ँये ।
यातुधानानामिति यातु – धानानाम् ( ) । ये वा । वा वनस्पतीन् ।
वनस्पतीꣳरनु । अन्वित्यनु ॥ ये वा । वाऽवटेषु । अवटेषु शेरते ।

शेरते तेभ्यः । तेभ्यः सर्पेभ्यः । सर्पेभ्यो नमः ।
नम इति नमः ॥ 35 (61/64)

*(महो – ऽनु – यातुधाना – मेकादश च) (A8)*

**T.S.4.2.9.1 - Kramam**

ध्रुवाऽसि । असि धरुणा । धरुणा ऽस्तृता । अस्तृता विश्वकर्मणा ।
विश्वकर्मणा सुकृता । विश्वकर्मणेति विश्व – कर्मणा । सुकृतेति
सु – कृता ॥ मा त्वा । त्वा समुद्रः । समुद्र उत् । उद् वधीत् ।
वधीन् मा । मा सुपर्णः । सुपर्णो ऽव्यथमाना । सुपर्ण इति
सु – पर्णः । अव्यथमाना पृथिवीम् । पृथिवीम् दृ(गुं)ह ।
दृ(गुं)हेति दृ(गुं)ह ॥ प्रजापतिस्त्वा । प्रजापतिरिति प्रजा – पतिः ।
त्वा सादयतु । सादयतु पृथिव्याः । पृथिव्याः पृष्ठे । पृष्ठे व्यचस्वतीम् ।
व्यचस्वतीम् प्रथस्वतीम् । प्रथस्वतीम् प्रथः । प्रथोऽसि । असि
पृथिवी । पृथिव्यसि । असि भूः । भूरसि । असि भूमिः । भूमिरसि ।
अस्यदितिः । अदितिरसि । असि विश्वधायाः । विश्वधाया विश्वस्य ।
विश्वधाया इति विश्व – धायाः । विश्वस्य भुवनस्य । भुवनस्य धर्त्री ।
धर्त्री पृथिवीम् । पृथिवीं ँयच्छ । यच्छ पृथिवीम् । पृथिवीम् दृ(गुं)ह ।

दृ॒ꣳ॒ह पृ॒थि॒वीम् । पृ॒थि॒वीम् मा । मा हि॒ꣳ॒सीः । हि॒ꣳ॒सी॒र् विश्वस्मै ।
विश्वस्मै प्रा॒णाय । प्रा॒णाया॒पानाय । प्रा॒णायेति प्र – अ॒नाय ।
अ॒पा॒नाय व्या॒नाय । अ॒पा॒नायेत्यप – अ॒नाय । व्या॒नायो॒दानाय ।
व्या॒नायेति वि – अ॒नाय । उ॒दा॒नाय प्रति॒ष्ठायै । उ॒दा॒नायेत्युत् – अ॒नाय ।
प्र॒ति॒ष्ठायै च॒रित्राय । प्र॒ति॒ष्ठा॒या॒ इति प्रति – स्थायै । **36 (50/59)**

**T.S.4.2.9.2 - Kramam**

च॒रित्राया॒ग्निः । अ॒ग्निस्त्वा । त्वा॒ऽभि । अ॒भि पा॒तु । पा॒तु म॒ह्या ।
म॒ह्या स्व॒स्त्या । स्व॒स्त्या छ॒र्दिषा । छ॒र्दि॒षा शन्तमेन । शन्तमे॒न तया ।
शन्त॒मे॒नेति शम् – त॒मे॒न । तया दे॒वतया । दे॒वतया ऽङ्गिर॒स्वत् ।
अ॒ङ्गि॒र॒स्वद् ध्रु॒वा । ध्रु॒वा सीद । सी॒देति सीद ॥ काण्डात्काण्डात्
प्र॒रोहन्ती । काण्डात्काण्डा॒दि॒ति काण्डात् – का॒ण्डा॒त् । प्र॒रोह॒न्ती
परुषःपरुषः । प्र॒रो॒हन्तीति प्र – रोहन्ती । परुषःपरु॒षः परि ।
परुषःपरु॒ष इ॒ति परुषः – प॒रु॒षः । परी॒ति परि ॥ ए॒वा नः । नो॒ दू॒र्वे॒ ।
दू॒र्वे॒ प्र । प्र त॒नु । त॒नु॒ स॒हस्रेण । स॒हस्रेण श॒तेन । श॒तेन च ।
चेति च ॥ या श॒तेन । श॒तेन प्र॒तनोषि । प्र॒त॒नोषि स॒हस्रेण ।
प्र॒तनोषीति प्र – त॒नोषि । स॒हस्रेण वि॒रोहसि ।

विरोहसीति वि – रोहसि ॥ तस्यास्ते । ते देवि । देवीष्टके ।
इष्टके विधेम । विधेम हविषा । हविषा वयम् । वयमिति वयम् ॥
अषाढाऽसि । असि सहमाना । सहमाना सहस्व । सहस्वारातीः ।
अरातीः सहस्व । सहस्वारातीयतः । अरातीयतः सहस्व ।
सहस्व पृतनाः । पृतनाः सहस्व । सहस्व पृतन्यतः ।
पृतन्यत इति पृतन्यतः ॥ सहस्रवीर्याऽसि ।
सहस्रवीर्येति सहस्र – वीर्या । **37 (50/56)**

**T.S.4.2.9.3 - Kramam**

असि सा । सा मा । मा जिन्व । जिन्वेति जिन्व ॥ मधु वाताः ।
वाता ऋतायते । ऋतायते मधु । ऋतायत इत्यृत–यते । मधु क्षरन्ति ।
क्षरन्ति सिन्धवः । सिन्धव इति सिन्धवः ॥ मादध्वीर् नः । नः सन्तु ।
सन्त्वोषधीः । ओषधीरित्योषधीः ॥ मधु नक्तम् । नक्तमुत । उतोषसि ।
उषसि मधुमत् । मधुमत् पार्थिवम् । मधुमदिति मधु – मत् ।
पार्थिव॒ं रजः । रज इति रजः ॥ मधु द्यौः । द्यौरस्तु । अस्तु नः ।
नः पिता । पितेति पिता ॥ मधुमान् नः । मधुमानिति मधु – मान् ।
नो वनस्पतिः । वनस्पतिर् मधुमान् । मधुमा॒ं अस्तु ।

मधुमानिति मधु – मान् । अस्तु सूर्यः । सूर्य इति सूर्यः ॥

माद्ध्वीर् गावः । गावो भवन्तु । भवन्तु नः । न इति नः ॥

मही द्यौः । द्यौः पृथिवी । पृथिवी च । च नः । न इमम् ।

इमम् यज्ञम् । यज्ञम् मिमिक्षताम् । मिमिक्षतामिति मिमिक्षताम् ॥

पिपृताम् नः । नो भरीमभिः । भरीमभिरिति भरीम – भिः ॥

तद् विष्णोः । विष्णोः परमम् । परमम् पदम् । **38 (50/54)**

**T.S.4.2.9.4 - Kramam**

पद॑ सदा । सदा पश्यन्ति । पश्यन्ति सूरयः । सूरय इति सूरयः ॥

दिवीव । इव चक्षुः । चक्षुराततम् । आततमित्या – ततम् ॥

ध्रुवाऽसि । असि पृथिवि । पृथिवि सहस्व । सहस्व पृतन्यतः ।

पृतन्यत इति पृतन्यतः । स्यूता देवेभिः । देवेभिरमृतेन । अमृतेना ।

आऽगाः । अगा इत्यगाः ॥ या स्ते । ते अग्ने । अग्ने सूर्ये ।

सूर्ये रुचः । रुच उद्यतः । उद्यतो दिवम् । उद्यत इत्युत् – यतः ।

दिवमातन्वन्ति । आतन्वन्ति रश्मिभिः । आतन्वन्तीत्या – तन्वन्ति ।

रश्मिभिरिति रश्मि – भिः ॥ ताभिः सर्वाभिः । सर्वाभी रुचे ।

रुचे जनाय । जनाय नः । नस्कृधि । कृधीति कृधि ॥ या वः ।

वो देवाः । देवाः सूर्ये । सूर्ये रुचः । रुचो गोषु । गोष्वश्वेषु । अश्वेषु याः । या रुचः । रुच इति रुचः ॥ इन्द्राग्नी ताभिः । इन्द्राग्नी इतीन्द्र – अग्नी । ताभिः सर्वाभिः । सर्वाभी रुचम् । रुचम् नः । नो धत्त । धत्त बृहस्पते । बृहस्पत इति बृहस्पते ॥ विराड् ज्योतिः । विराडिति वि – राट् । **39 (50/54)**

**T.S.4.2.9.5 - Kramam**

ज्योतिरधारयत् । अधारयथ् सम्राट् । सम्राड् ज्योतिः । सम्राडिति सम् – राट् । ज्योतिरधारयत् । अधारयथ् स्वराट् । स्वराड् ज्योतिः । स्वराडिति स्व – राट् । ज्योतिरधारयत् । अधारयदित्यधारयत् ॥ अग्ने युक्ष्व । युक्ष्वा हि । हि ये । ये तव । तवाश्वासः । अश्वासो देव । देव साधवः । साधव इति साधवः ॥ अरं ँवहन्ति । वहन्त्याशवः । आशव इत्याशवः ॥ युक्ष्वा हि । हि देवहूतमान् । देवहूतमाꣳ अश्वान् । देवहूतमानिति देव–हूतमान् । अश्वाꣳ अग्ने । अग्ने रथीः । रथीरिव । इवेतीव ॥ नि होता । होता पूर्व्यः । पूर्व्यः सदः । सद इति सदः ॥ द्रप्सश्चस्कन्द । चस्कन्द पृथिवीम् । पृथिवीमनु । अनु द्याम् । द्यामिमम् । इमम् च । च योनिम् ।

योनिमनु । अनु यः । यश्च । च पूर्वः । पूर्व इति पूर्वः ॥ तृतीयं
ँयोनिम् । योनिमनु । अनु सञ्चरन्तम् । सञ्चरन्तम् द्रप्सम् ।
सञ्चरन्तमिति सम् – चरन्तम् । द्रप्सम् जुहोमि । जुहोम्यनु ।
अनु सप्त । सप्त होत्राः । **40** (**50/54**)

**T.S.4.2.9.6 - Kramam**

होत्रा इति होत्राः ॥ अभूदिदम् । इदं ँविश्वस्य । विश्वस्य भुवनस्य ।
भुवनस्य वाजिनम् । वाजिनमग्नेः । अग्नेर् वैश्वानरस्य । वैश्वानरस्य
च । चेति च ॥ अग्निर् ज्योतिषा । ज्योतिषा ज्योतिष्मान् ।
ज्योतिष्मान् रुक्मः । रुक्मो वर्चसा । वर्चसा वर्चस्वान् ।
वर्चस्वानिति वर्चस्वान् ॥ ऋचे त्वा । त्वा रुचे । रुचे त्वा ।
त्वा सम् । समित् । इथ् स्रवन्ति । स्रवन्ति सरितः । सरितो न ।
न धेनाः । धेना इति धेनाः ॥ अन्तर्. हृदा । हृदा मनसा । मनसा
पूयमानाः । पूयमाना इति पूयमानाः ॥ घृतस्य धाराः । धारा अभि ।
अभि चाकशीमि । चाकशीमीति चाकशीमि ॥ हिरण्ययो वेतसः ।
वेतसो मद्ध्ये । मद्ध्य आसाम् । आसामित्यासाम् ॥
तस्मिन्थ् सुपर्णः । सुपर्णो मधुकृत् । सुपर्ण इति सु – पर्णः ।

मधुकृत् कुलायी । मधुकृदिति मधु – कृत् । कुलायी भजन्न् ।
भजन्नास्ते । आस्ते मधु । मधु देवताभ्यः । देवताभ्य इति
देवताभ्यः ॥ तस्यासते । आसते हरयः । हरयः सप्त ।
सप्त तीरे ( ) । तीरे स्वधाम् । स्वधाम् दुहानाः ।
स्वधामिति स्व – धाम् । दुहाना अमृतस्य । अमृतस्य धाराम् ।
धारामिति धाराम् ॥ 41 (54/57) *(प्रतिष्ठायै – सहस्रवीर्या – (परमं – ँविराट्थ् – सप्त – तीरे – चत्वारि च) (A9)*

**T.S.4.2.10.1 - Kramam**

आदित्यम् गर्भम् । गर्भम् पयसा । पयसा समञ्जन्न् । समञ्जन्थ्
सहस्रस्य । समञ्जन्निति सं – अञ्जन्न् । सहस्रस्य प्रतिमाम् ।
प्रतिमां ँविश्वरूपम् । प्रतिमामिति प्रति – माम् । विश्वरूपमिति
विश्व–रूपम् ॥ परि वृङ्ग्धि । वृङ्ग्धि हरसा । हरसा मा । माऽभि ।
अभि मृक्षः । मृक्षः शतायुषम् । शतायुषम् कृणुहि । शतायुषमिति
शत – आयुषम् । कृणुहि चीयमानः । चीयमान इति चीयमानः ॥
इमम् मा । मा हिꣳसीः । हिꣳसीर् द्विपादम् । द्विपादम् पशूनाम् ।
द्विपादमिति द्वि – पादम् । पशूनाꣳ सहस्राक्ष । सहस्राक्ष मेधे ।

सहस्राक्षेति सहस्र - अक्ष । मेध आ । आ चीयमानः । चीयमान इति चीयमानः ॥ मयुमारण्यम् । आरण्यमनु । अनु ते । ते दिशामि । दिशामि तेन । तेन चिन्वानः । चिन्वानस्तनुवः । तनुवो नि । नि षीद । सीदेति सीद ॥ वातस्य ध्राजिम् । ध्राजिं ँवरुणस्य । वरुणस्य नाभिम् । नाभिमश्वम् । अश्वम् जज्ञानम् । जज्ञान॑ँ सरिरस्य । सरिरस्य मद्ध्ये । मद्ध्य इति मद्ध्ये ॥ शिशुम् नदीनाम् । नदीना॑ँ हरिम् । हरिमद्रिबुद्ध्नम् । अद्रिबुद्ध्नमग्ने । अद्रिबुद्ध्नमित्यद्रि - बुद्ध्नम् । अग्ने मा । मा हि॑ँसीः । हि॑ँसीः परमे । **42 (50/56)**

**T.S.4.2.10.2 - Kramam**

परमे व्योमन्न् । व्योमन्निति वि-ओमन्न् ॥ इमम् मा । मा हि॑ँसीः । हि॑ँसीरेकशफम् । एकशफम् पशूनाम् । एकशफमित्येक - शफम् । पशूनाम् कनिक्रदम् । कनिक्रदं ँवाजिनम् । वाजिनं ँवाजिनेषु । वाजिनेष्विति वाजिनेषु ॥ गौरमारण्यम् । आरण्यमनु । अनु ते । ते दिशामि । दिशामि तेन । तेन चिन्वानः । चिन्वान स्तनुवः । तनुवो नि । नि षीद । सीदेति सीद ॥ अजस्रमिन्दुम् । इन्दुमरुषम् । अरुषम् भुरण्युम् । भुरण्युमग्निम् । अग्निमीडे । ईडे पूर्वचित्तौ ।

पूर्वचित्तौ नमोभिः । पूर्वचित्ताविति पूर्व – चित्तौ । नमोभिरिति
नमः – भिः ॥ स पर्वभिः । पर्वभिर्. ऋतुशः । पर्वभिरिति
पर्व – भिः । ऋतुशः कल्पमानः । ऋतुश इत्यृतु – शः ।
कल्पमानो गाम् । गाम् मा । मा हि॒ꣳसीः । हि॒ꣳसीरदितिम् ।
अदितिं ँविराजम् । विराजमिति वि – राजम् ॥ इमꣳ समुद्रम् ।
समुद्रꣳ शतधारम् । शतधारमुथ्सम् । शतधारमिति शत – धारम् ।
उथ्सं ँव्यच्यमानम् । व्यच्यमानम् भुवनस्य । व्यच्यमानमिति
वि – अच्यमानम् । भुवनस्य मद्ध्ये । मद्ध्य इति मद्ध्ये ॥
घृतम् दुहानाम् । दुहानामदितिम् । अदितिम् जनाय । जनायाग्ने ।
अग्ने मा । मा हिꣳसीः । **43 (50/56)**

**T.S.4.2.10.3 - Kramam**

हिꣳसीः परमे । परमे व्योमन्न् । व्योमन्निति वि – ओमन्न् ॥
गवयमारण्यम् । आरण्यमनु । अनु ते । ते दिशामि । दिशामि तेन ।
तेन चिन्वानः । चिन्वानस्तनुवः । तनुवो नि । नि षीद ।
सीदेति सीद ॥ वरूत्रिम् त्वष्टुः । त्वष्टुर् वरुणस्य । वरुणस्य नाभिम् ।
नाभिमविम् । अविम् जज्ञानाम् । जज्ञानाꣳ रजसः ।

रजसः परस्मात् । परस्मादिति परस्मात् ॥ महीꣳ साहस्रीम् ।
साहस्रीमसुरस्य । असुरस्य मायाम् । मायामग्ने । अग्ने मा ।
मा हिꣳसीः । हिꣳसीः परमे । परमे व्योमन्न् । व्योमन्निति
वि–ओमन्न् ॥ इमामूर्णायुम् । ऊर्णायुंँवरुणस्य । वरुणस्य मायाम् ।
मायाम् त्वचम् । त्वचम् पशूनाम् । पशूनाम् द्विपदाम् । द्विपदाम्
चतुष्पदाम् । द्विपदामिति द्वि – पदाम् । चतुष्पदामिति चतुः–पदाम् ॥
त्वष्टुः प्रजानाम् । प्रजानाम् प्रथमम् । प्रजानामिति प्र – जानाम् ।
प्रथमम् जनित्रम् । जनित्रमग्ने । अग्ने मा । मा हिꣳसीः ।
हिꣳसीः परमे । परमे व्योमन्न् । व्योमन्निति वि – ओमन्न् ॥
उष्ट्रमारण्यम् । आरण्यमनु । अनु ते । **44** (**50/52**)

**T.S.4.2.10.4 - Kramam**

ते दिशामि । दिशामि तेन । तेन चिन्वानः । चिन्वानस्तनुवः ।
तनुवो नि । नि षीद । सीदेति सीद ॥ यो अग्निः । अग्निरग्नेः ।
अग्ने स्तपसः । तपसोऽधि । अधि जातः । जातः शोचात् ।
शोचात् पृथिव्याः । पृथिव्या उत । उत वा । वा दिवः । दिवस्परि ।

परीति परि ॥ येन प्रजाः । प्रजा विश्वकर्मा । प्रजा इति प्र – जाः । विश्वकर्मा व्यानट् । विश्वकर्मेति विश्व – कर्मा । व्यानट् तम् । व्यानडिति वि–आनट् । तमग्ने । अग्ने हेडः । हेडः परि । परि ते । ते वृणक्तु । वृणक्त्विति वृणक्तु ॥ अजा हि । ह्यग्नेः । अग्नेरजनिष्ट । अजनिष्ट गर्भात् । गर्भाथ् सा । सा वै । वा अपश्यत् । अपश्यज् जनितारम् । जनितारमग्रे । अग्र इत्यग्रे ॥ तया रोहम् । रोहमायन्न् । आयन्नुप । उप मेद्ध्यासः । मेद्ध्यासस्तया । तया देवाः । देवा देवताम् । देवतामग्रे । अग्र आयन्न् । आयन्नित्यायन्न् ॥ शरभमारण्यम् ( ) । आरण्यमनु । अनु ते । ते दिशामि । दिशामि तेन । तेन चिन्वानः । चिन्वान स्तनुवः । तनुवो नि । नि षीद । सीदेति सीद ॥ **45** (**59/62**)

*(अग्ने मा हिꣳसी–रग्ने मोष्ट्रमा–रण्यमनु–शरभम्–नव च) (A10)*

**T.S.4.2.11.1 - Kramam**

इन्द्राग्नी रोचना । इन्द्राग्नी इतीन्द्र – अग्नी । रोचना दिवः । दिवः परि । परि वाजेषु । वाजेषु भूषथः । भूषथ इति भूषथः ॥

तद् वाम् । वां चेति । चेति प्र । प्र वीर्यम् । वीर्यमिति वीर्यम् ॥
२ञथद् वृत्रम् । वृत्रमुत । उत सनोति । सनोति वाजम् ।
वाजमिन्द्रा । इन्द्रा यः । यो अग्नी । अग्नी सहुरी । अग्नी इत्यग्नी ।
सहुरी सपर्यात् । सहुरी इति स - हुरी । सपर्यादिति सपर्यात् ॥
इरज्यन्ता वसव्यस्य । वसव्यस्य भूरेः । भूरेः सहस्तमा । सहस्तमा
सहसा । सहस्तमेति सहः - तमा । सहसा वाजयन्ता । वाजयन्तेति
वाज - यन्ता ॥ प्र चर्.षणिभ्यः । चर्.षणिभ्यः पृतना । चर्.षणिभ्य
इति चर्.षणि - भ्यः । पृतना हवेषु । हवेषु प्र । प्र पृथिव्याः ।
पृथिव्या रिरिचाथे । रिरिचाथे दिवः । रिरिचाथे इति रिरिचाथे ।
दिवश्च । चेति च ॥ प्र सिन्धुभ्यः । सिन्धुभ्यः प्र । सिन्धुभ्य इति
सिन्धु - भ्यः । प्र गिरिभ्यः । गिरिभ्यो महित्वा । गिरिभ्य इति
गिरि - भ्यः । महित्वा प्र । महित्वेति महि - त्वा । प्रेन्द्राग्नी ।
इन्द्राग्नी विश्वा । इन्द्राग्नी इतीन्द्र - अग्नी । विश्वा भुवना ।
भुवनाऽति । अत्यन्या । अन्येत्यन्या ॥ मरुतो यस्य ।
यस्य हि । हि क्षये । **46 (50/60)**

**T.S.4.2.11.2 - Kramam**

क्षये पाथ । पाथा दिवः । दिवो विमहसः । विमहस इति वि – महसः ॥ स सुगोपातमः । सुगोपातमो जनः । सुगोपातम इति सुगोप – तमः । जन इति जनः ॥ यज्ञैर् वा । वा यज्ञवाहसः । यज्ञवाहसो विप्रस्य । यज्ञवाहस इति यज्ञ – वाहसः । विप्रस्य वा । वा मतीनाम् । मतीनामिति मतीनाम् ॥ मरुतः शृणुत । शृणुता हवम् । हवमिति हवम् ॥ श्रियसे कम् । कम् भानुभिः । भानुभिः सम् । भानुभिरिति भानु – भिः । सम् मिमिक्षिरे । मिमिक्षरे ते । ते रश्मिभिः । रश्मिभिस्ते । रश्मिभिरिति रश्मि–भिः । त ऋक्वभिः । ऋक्वभिः सुखादयः । ऋक्वभिरित्यृक्व – भिः । सुखादय इति सु – खादयः ॥ ते वाशीमन्तः । वाशीमन्त इष्मिणः । वाशीमन्त इति वाशि – मन्तः । इष्मिणो अभीरवः । अभीरवो विद्रे । विद्रे प्रियस्य । प्रियस्य मारुतस्य । मारुतस्य धाम्नः । धाम्न इति धाम्नः ॥ अव ते । ते हेडः । हेड उत् । उदुत्तमम् । उत्तममित्युत् – तमम् ॥ कया नः । नश्चित्रः । चित्र आ । आ भुवत् । भुवदूती । ऊती सदावृधः । सदावृधः सखा । सदावृध इति सदा – वृधः ।

सखेति सखा । कया शचिष्ठया । शचिष्ठया वृता ।

वृतेति वृता ॥ **47** (**50/57**)

**T.S.4.2.11.3 - Kramam**

को अद्य । अद्य युङ्क्ते । युङ्क्ते धुरि । धुरि गाः । गा ऋतस्य ।

ऋतस्य शिमीवतः । शिमीवतो भामिनः । भामिनो दुर्.हृणायून् ।

दुर्.हृणायूनिति दुः - हृणायून् ॥ आसन्निषून् हृथ्स्वसः ।

आसन्निषूनित्यासन् - इषून् । हृथ्स्वसो मयोभून् । हृथ्स्वस इति

हृथ्सु - असः । मयोभून्. यः । मयोभूनिति मयः-भून् । य एषाम् ।

एषाम् भृत्याम् । भृत्यामृणधत् । ऋणधथ् सः । स जीवात् ।

जीवादिति जीवात् ॥ अग्ने नय । नया । आ देवानाम् । देवाना॑ꣳ

शम् । शम् नः । नो भवन्तु । भवन्तु वाजेवाजे । वाजेवाज इति

वाजे - वाजे ॥ अफ्स्वग्ने । अफ्स्वित्यप् - सु । अग्ने सधिः ।

सधिष्ट्व । तव सः । सौषधीः । ओषधीरनु । अनु रुद्ध्यसे ।

रुद्ध्यस इति रुद्ध्यसे ॥ गर्भे सन्न् । सन् जायसे । जायसे पुनः ।

पुनरिति पुनः ॥ वृषा सोम । सोम द्युमान् । द्युमा॑ꣳ असि ।

द्युमानिति द्यु - मान् । असि वृषा । वृषा देव । देव वृषव्रतः ।

वृषव्रत इति वृष – व्रतः ॥ वृषा धर्माणि । धर्माणि दधिषे ।
दधिष इति दधिषे ॥ इमम् मे ( ) । मे वरुण । वरुण तत् ।
तत् त्वा । त्वा यामि । यामि त्वम् । त्वम् नः । नो अग्ने ।
अग्ने सः । स त्वम् । त्वम् नः । नो अग्ने ।
अग्ने इत्यग्ने ॥ **48** (**61/66**)

*(हि – वृता – म – एकादश च) (A11)*

============

| **Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-** |
|---|
| (विष्णोः क्रमोऽसि – दिवस्प – यन्नपते – ऽपेत – समितं – याँ जाता – मा नो हि॒ꣳसी – दभ्यस्थाद् – ध्रुवा – ऽस्यादित्यङ्गर्भ – मिन्द्राग्नी रोच – नैकादश ) |

| **Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-** |
|---|
| (विष्णो – रस्मिन् हव्ये – ति त्वाऽहं – धीतिभि – र्होत्रा – अष्टाचत्वारि॒ꣳशत्) |

| **First and Last Padam of Second Prasnam of 4th Kandam** |
|---|
| (विष्णोः क्रमोऽसि – त्वन्नो अग्ने स त्वन्नो अग्ने ) |

॥ हरिः ओं ॥

॥ इति चतुर्थ काण्डे द्वितीयः प्रश्नः – क्रम पाठः समाप्तः ॥

==============

**Details of Panchati, Padam and Krama Vaakyam for**
**Kandam 4 – Prasanam 2 – TS 4.2**

| | Panchati | Padams | Krama Vaakyams |
|---|---|---|---|
| Anuvakam 1 | 5 | 266 | 297 |
| Anuvakam 2 | 4 | 204 | 224 |
| Anuvakam 3 | 4 | 216 | 238 |
| Anuvakam 4 | 4 | 198 | 218 |
| Anuvakam 5 | 6 | 322 | 362 |
| Anuvakam 6 | 5 | 268 | 298 |
| Anuvakam 7 | 4 | 189 | 216 |
| Anuvakam 8 | 3 | 161 | 172 |
| Anuvakam 9 | 6 | 304 | 334 |
| Anuvakam 10 | 4 | 209 | 226 |
| Anuvakam 11 | 3 | 161 | 183 |
| Total → | 48 | 2498 | 2768 |